Roll No. :

कुल प्रश्नों की संख्या : 18 ]
Total No. of Questions : 18 ]

[ कुल मुद्रित पृष्ठों की संख्या : 8
[ Total No. of Printed Pages : 8

# H-251090–B

## विषय : संस्कृत

## Subject : Sanskrit

समय : 3 घण्टे ]
Time : 3 hours ]

[ पूर्णांक : 75
[ Maximum Marks : 75

**निर्देश** : (i) सर्वे प्रश्नाः समाधेयाः।
(ii) सुन्दरं सुस्पष्टञ्च लिखत।

**प्रश्न–1** निम्नलिखितयोः रेखाङ्कित पदयोः संधि-विच्छेदं कृत्वा लिखत— [1×2=2]

(क) शिवस्य नाम दिगम्बरः अस्ति।

(ख) कविर्लिखति लेखम्।

**प्रश्न–2** रेखाङ्कित प्रकृति-प्रत्ययोः योजयित्वा लिखत— [1×2=2]

(क) महिला हास्य कथां श्रु+क्त्वा उच्चैः हसति।

(ख) मनुष्य+त्व कदापि न त्यज्।

**प्रश्न–3** निम्नलिखितयोः अङ्कयोः संस्कृतभाषया लिखत— [1×2=2]

(क) 138 (ख) 144

**प्रश्न–4** यथानिर्देशं वाच्यं परिवर्तयत— [1×2=2]

(क) बालकेन वृक्षाः गण्यन्ते। (कर्तृवाच्ये)

(ख) शिशुः स्वपिति। (भाववाच्ये)

P.T.O.



https://www.cgboardonline.com

**प्रश्न-5** समासविग्रहं कृत्वा लिखत— [1×3=3]

(क) अस्वस्थ:

(ख) पीतदुग्धा

(ग) धर्मार्थकाममोक्षा:

**प्रश्न-6** अधोलिखितानि वाक्यानि संशोध्य लिखत— [1×3=3]

(क) अहम् अध्ययनं कृत्वा खादसि।

(ख) राम: कुत्र गच्छन्ति?

(ग) बालिका विद्यालयं गतवान्।

**प्रश्न-7** निर्देशानुसारं लकारं परिवर्तनं कृत्वा लिखत— [1×3=3]

(क) अहं त्वां पश्यामि। (लङ्लकारे)

(ख) स: पाठं पठति। (लोट्लकारे)

(ग) रमा लेखम् अलिख:। (लट्लकारे)

**प्रश्न-8** अधोलिखितं गद्यांशं पठित्वा निर्देशानुसारेण प्रश्नानाम् उत्तराणि लिखत— [1×3=3]

न्यायाधीशेन पुनस्तौ घटनाया: विषये वक्तुमादिष्टौ। आरक्षिणि निजपक्षं प्रस्तुतवति आश्चर्यमघटत् स शव: प्रावारकमपसार्य न्यायाधीशम् अभिवाद्य निवेदितवान्—मान्यवर! एतेन आरक्षिणा अध्वनि यदुक्तं तद वर्णयामि— "त्वया अहं चोरिताया: मञ्जूषाया: ग्रहणाद् वारित:, अत: निजकृत्यस्य फलं भुङ्क्ष्व। अस्मिन् चौराभियोगे त्वं वर्षत्रयस्य कारादण्डं लप्स्यसे" इति। न्यायाधीश: आरक्षिणे कारादण्डमादिश्य तं जनं ससम्मानं मुक्तवान्।

**प्रश्ना:—**

(क) "न्यायाधीशेन पुनस्तौ घटनाया: विषये वक्तुमादिष्टौ" इति वाक्यस्य हिन्दीभाषया अनुवादं कुरुत।

(ख) 'तं जनम्' इत्यनयो: पदयो: विशेषण पदं किं प्रयुक्तम्?

(ग) 'प्रणम्य' इत्यस्य कृते गद्यांशे किं पर्यायपदं प्रयुक्तम्?



https://www.cgboardonline.com

**प्रश्न-9** अधोलिखितं गद्यांशं पठित्वा निर्देशानुसारेण प्रश्नानाम् उत्तराणि लिखत— [1×3=3]

यदा वर्षाकाले अरपानद्यां जलप्लावनं जातम्। तदा बिलासा नौकया जनान् संतारयति स्म। एवमेव सा नौकाचालनेऽपि पारङ्गता जाता। सा लोकनृत्यगीतयोः अपि सिद्धा आसीत्। ग्रामस्य सर्वेषु कार्यक्रमेषु सा अग्रसरासीत्।

**प्रश्नाः—**

(क) "एवमेव सा नौकाचालनेऽपि पारङ्गता जाता।" इत्यस्य हिन्दीभाषया अनुवादं कुरुत।

(ख) 'सन्तारयति स्म' इति क्रियापदस्य कर्तृपदं गद्यांशे किमस्ति?

(ग) 'सर्वेषु कार्यक्रमेषु' अनयोः पदयोः विशेषणपदं किम् अस्ति?

**प्रश्न-10** अधोलिखितं श्लोकं निर्देशानुसारेण उत्तरत— [1×3=3]

शस्त्रहता न हि हता रिपवो भवन्ति,
प्रज्ञाहतास्तुरिपवः सुहता भवन्ति।
शस्त्रं निहन्ति पुरुषस्य शरीरमेकम्,
प्रज्ञा कुलञ्च विभवञ्च यशश्च हन्ति॥

**प्रश्नाः—**

(क) "शस्त्रहता न हि हता रिपवो भवन्ति" इति वाक्यस्य हिन्दीभाषया अनुवादं कुरुत।

(ख) 'बुद्धिः' इति पदस्य अत्र किं पर्यायपदं प्रयुक्तम्?

(ग) 'मित्राणि' इति पदस्य श्लोके विलोमपदं किम् अस्ति?

**प्रश्न-11** अधोलिखितं श्लोकं पठित्वा निर्देशानुसारेण उत्तरत— [1×3=3]

मातागुरुतराभूमेः खादप्युच्चतरः पिता।
मनः शीघ्रतरं वाताच्चिन्ता बहुतरी तृणात्॥

**प्रश्नाः—**

(क) 'आकाशात्' इत्यस्य कृते श्लोके किं पर्यायपदं प्रयुक्तम्?

(ख) "वातात् शीघ्रतरं मनः" इति वाक्यस्य हिन्दी अनुवादं कुरुत।

(ग) 'माता गुरुतरा' इत्यनयोः पदयोः विशेषणपदं किम्?



https://www.cgboardonline.com

**प्रश्न-12** अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत (केषाञ्चित् चतुर्णाम्)— [1×4=4]

(क) कयोः मध्ये मित्रता अभवत्?

(ख) दीपमालिका पर्वणि कस्य शब्दः श्रूयते?

(ग) कतिधा मङ्गलयानस्य मार्गः परिवर्तितः?

(घ) कः वंशम् आख्याति?

(ङ) केन न प्रकाशते?

(च) के रोगाणाम् अपहारकाः?

**प्रश्न-13** अधोलिखितेषु वाक्येषु रेखाङ्कित पदमाधृत्य प्रश्न-निर्माणं कुरुत— [1×4=4]

(क) पुत्रं द्रष्टुं सः प्रस्थितः।

(ख) प्राणेभ्यः अपि प्रियः सुहृद्।

(ग) उभौ शवं चत्वरे स्थापितवन्तौ।

(घ) तृणानाम् अग्निना सह विरोधः भवति।

***अथवा***

अधोलिखितानां प्रश्नानाम् उत्तराणि हिन्दीभाषया लिखत—

(क) शृगालः वधूं किं निर्देशितवान्?

(ख) वृक्षाः प्राणिनां कथम् उपकुर्वन्ति?

(ग) हेमन्तकाले किं सुखावहं भवति?

(घ) 'ओदनं सूक्तं' कस्मात् वेदात् उद्धृतः?

**प्रश्न-14** स्वपाठ्यपुस्तकात् चतस्रः सूक्तयः लिखत याः अस्मिन् प्रश्नपत्रे नागताः स्युः। [1×4=4]

***अथवा***

अधः प्रदत्तानां सूक्तीनां हिन्दीभाषया भावार्थं लिखत—

(क) अत्यादरः शंकनीयः।

(ख) छिद्रेष्वनर्थाः बहुली भवन्ति।

(ग) समानशीलव्यसनेषु सख्यम्।

(घ) परिवारः लघु एव वरम्।



https://www.cgboardonline.com

प्रश्न-15 स्वपाठ्यपुस्तकात् कौचित् द्वौ सुभाषित श्लोकौ लिखत यौ अस्मिन् प्रश्नपत्रे न समागतौ स्याताम्। [$2\frac{1}{2}\times2=5$]

***अथवा***

अध: द्वौ अपूर्णौ सुभाषित श्लोकौ प्रदीयते, तौ श्लोकौ स्वपाठ्य-पुस्तकाधारेण पूरयत–

(क) वायुनां शोधका: वृक्षा: ——।
—— रक्षणं च हितावहम्॥

(ख) उद्यम: साहसं धैर्य —— ।
—— देव: सहायकृत्॥

प्रश्न-16 (अ) भवत: नाम राजेश: अस्ति। भवत: विद्यालयस्य नाम शासकीय: उच्चतर: माध्यमिक: विद्यालय: बिलासपुरम् अस्ति। स्वस्य अपरिहार्य कारणात् अवकाशस्य हेतो: स्वप्राचार्यं प्रति एकम् आवेदनं पत्रं लिखतु। [1+2+1=4]

***अथवा***

भवत: नाम दीपेश: अस्ति। भवान् अधोलिखितां मञ्जूषां दृष्ट्वा शुल्क मुक्त्यर्थं लिखते अस्मिन् पत्रे रिक्तस्थानानि पूरयन् आवेदनं पत्रं लिखतु– https://www.cgboardonline.com [$\frac{1}{2}\times8=4$]

[ आशा से, पञ्चम्यां, पञ्चसहस्त्ररूप्यकाणि, निवेदनम्, अनुग्रहीष्यति, निर्वाह:, शुल्क मुक्तये, छात्र: ]

सेवायाम्

श्रीमान् प्राचार्य: महोदय:
शासकीय: उच्चतर: माध्यमिक:
विद्यालय: बिलासपुरम् (छत्तीसगढम्)

विषय:– (i) —— प्रार्थनापत्रम्।

महोदय!

सविनयं (ii) —— अस्ति। यदहं भवत: विद्यालये



https://www.cgboardonline.com

दशमकक्षाया: (iii) —— अस्मि। मम पिता एक: कृषक: अस्ति। तस्य मासिक: आय: (iv) —— अस्ति। मम एक: भ्राता अष्टमकक्षायां भगिनी च (v) —— कक्षायां पठति। अस्माकं कुटुम्बस्य (vi) —— अतीव काठिन्येन भवति।

अत: शुल्कमुक्त्यर्थं प्रार्थयेऽहम्। (vii) —— अत्र भवान् मम एतां प्रार्थनां स्वीकृत्य (viii) ——।

दिनाङ्क:—

भवत: विनीत: शिष्य:

दीपेश:

कक्षा-दशमी

(ब) अधोलिखितम् अपठितांशं पठित्वा निर्देशानुसारेण संस्कृतभाषया उत्तरत—

[1×4=4]

संसारे कोऽपि बाल: न जानाति यत् किं सद्वृत्तं किं च असद्वृत्तम्। बालस्तु ज्येष्ठान् वृद्धान् च पश्यति। ते वयोवृद्धा: यथा-यथा आचरन्ति बालोऽपि तथैव आचरति। शिष्टानां वंशेषु वृद्धा: युवान: बाला: महिलाश्च सर्वे परस्परं सभ्यताया: आलपन्ते ते अन्योन्यं सम्मानयन्ति। अशिष्टानां वंशेषु तु एतादृश: व्यवहार: न दृश्यते।

प्रश्ना:—

(क) संस्कृतभाषायां सारांशं लिखत।

**अथवा**

(क) केषां वंशेषु सर्वे सभ्यताया: आलपन्ते?

(ख) उचितं शीर्षकं लिखत।

**अथवा**

(ख) बाल: कान्-कान् पश्यति?

(ग) सदाचारणम् इत्यर्थे अत्र क: शब्द: प्रयुक्तम्?

(घ) 'ते' इति कर्तृपदस्य किं क्रियापदम् अत्र प्रयुक्तम्?



https://www.cgboardonline.com

प्रश्न-17 अध: प्रदत्तेषु विषयेषु कमपि एकमधिकृत्य संस्कृतभाषया द्वादश वाक्यै: निबन्धं लिखत— $[\frac{1}{2}\times12=6]$

(क) सदाचार:

(ख) महाकवि: कालिदास:

(ग) सुभाषचन्द्र:

(घ) मम प्रदेश: (छत्तीसगढ:)

प्रश्न-18 ( खण्ड-अ ) उचितं विकल्पं चित्वा लिखत— [1×5=5]

(i) तीरथगढप्रपातं वर्तते—

(क) बस्तरे (ख) कांकेर जनपदे

(ग) धमतरी जनपदे (घ) जशपुरे

(ii) वपु: आख्याति—

(क) वंशम् (ख) स्नेहम्

(ग) भोजनम् (घ) भाषितम्

(iii) 'जनके' इति पदे विभक्ति: अस्ति—

(क) तृतीया (ख) चतुर्थी

(ग) पञ्चमी (घ) सप्तमी

(iv) "गोपाल: सर्वदा सत्यं वदति।" इत्यस्मिन् वाक्ये अव्ययमस्ति—

(क) गोपाल: (ख) सर्वदा

(ग) सत्यम् (घ) वदति

(v) "अभित:, परित:, समया निकषा, हा" प्रतियोगे विभक्ति: भवति—

(क) प्रथमा (ख) तृतीया

(ग) द्वितीया (घ) पञ्चमी



https://www.cgboardonline.com

**प्रश्न-18 ( खण्ड-ब )** उचितं स्तम्भं सुमेलनं कुरुत— [1×5=5]

| ('क' स्तम्भम्) | | ('ख' स्तम्भम्) |
|---|---|---|
| (i) | अनुभवति | - शतृ प्रत्ययः |
| (ii) | कुर्वती | - उपसर्गः |
| (iii) | बिलासा अदम्य | - पञ्चमी विभक्तिः |
| (iv) | युष्मत् | - पर सवर्ण सन्धि |
| (v) | त्वं करोपि | - साहसिका आसीत् |

**प्रश्न-18 ( खण्ड-स )** उचितं विकल्पं चित्वा रिक्तस्थानानि पूरयत वाक्यं पुनः लिखत— [1×5=5]

[ चतुर्थी विभक्तिः, पयः, कोलाहलेन, मह्यम्, तथा ]

(i) क्रीडनं ——— अपि रोचते।

(ii) अलं ———।

(iii) निशान्ते च पिबेत् ———।

(iv) यथा बीजं ——— फलम्।

(v) 'दा' योगे ——— भवति।

• • •



https://www.cgboardonline.com